**दिनाङ्कः 20.03.2026**
**प्रातः - 06:55**
**संस्कृत वार्ताः**

## अथ वार्ताः

### राष्ट्रपति - वृन्दावन्:

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुवर्या अद्य उत्तरप्रदेशस्य वृन्दावने रामकृष्ण-मिशन्-सेवाश्रमस्य नन्द-किशोर-सोमानी-ओन्कोलोजी इति खण्डस्य उद्घाटनं करिष्यति। सा ऊडिया-बाबा-आश्रमं, दवनाल्-कुण्डं च द्रष्टुं निश्चिता अस्ति। राष्ट्रपतिः मुर्मुः वृन्दावने नीब्-करोरी-बाबा इत्यस्य समाधिम् अपि गत्वा पुष्पाञ्जलिं समर्पयिष्यति।

### प्रधानमन्त्री-अमीर कतर

प्रधानमन्त्री नरेन्द्रमोदी ह्यः कतर-देशस्य अमीर- शेख- तमीम- बिन- हमद- अल- थानी इत्यनेन सह दूरभाषद्वारा वार्तालापं कृत्वा तं कतर-देशस्य जनेभ्यश्च ईदुत्सवस्य शुभाशयाः प्रेषितवान्। सामाजिक-प्रसार-माध्यमे, प्रधानमन्त्री अवदत् यत् सः कतर-देशेन सह ऐक्यं स्थापयित्वा क्षेत्रस्य ऊर्जा-आधारिक-संरचनायाः उपरि कृताक्रमणानां दृढतया निन्दां करोतीति। सः भारतीयसमुदायस्य जनेभ्यः प्रदत्तायाः परिचर्यायै समर्थनाय च कृतज्ञतां प्रकटितवान्। सः अस्मिन् क्षेत्रे शान्तेः स्थिरतायाः च आशामपि प्रकटितवान्।

### प्रधानमन्त्री-ओमान/मलेशिया

सद्यः एव प्रधानमन्त्रिणा नरेन्द्रमोदिना ओमानस्य, जोर्डन-देशस्य, फ्रान्स-देशस्य, मलेशिया-देशस्य च नेतृभिः सह उच्च-स्तरीय-कूटनीतिक-वार्तालाप-श्रृङ्खलायां वार्तालापो विहितः। संवादः कूटनीतिं, क्षेत्रीयस्थिरताञ्चाधिकृत्य भारतस्य प्रतिबद्धतां पुनः दृढीकर्तुं, पश्चिम-एशियादेशे उद्विग्नताम् न्यूनीकर्तुं केन्द्रितः आसीत्। ओमान-जोर्डन्-देशयोः नेतृभिः सह वार्तालापं कुर्वन्, श्रीमोदी, अस्मिन् क्षेत्रे लम्बितानामवरुद्धानां वा भारतीय-नागरिकाणां सुरक्षित-प्रत्यागमनाय तेषां कृतप्रयत्नानां प्रशंसाम् अकरोत्।

### MEA-ब्रीफिंग:

सम्पूर्णे गल्फ्-प्रदेशे ऊर्जा-स्थापनानां उपरि सद्यः एव कृताक्रमणानां विषये भारतदेशः चिन्तां प्रकटितवान्, प्रकरणमिमञ्च अतीव चिन्ताजनकम् इति अमन्यत्। प्रसारमाध्यमानां प्रश्नानां प्रतिक्रियारूपेण, विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जैसवालः अवदत् यत्, आक्रमणानि पूर्वमेव अनिश्चित-वैश्विक-ऊर्जा-परिदृश्यम् अस्थिरं करिष्यतीति। श्रीजैसवालः अवदत् यत् एतादृशानि आक्रमणानि अस्वीकार्यानि सन्ति, तेषां निवारणं आवश्यकमिति। नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत् ऊर्जा-आपूर्तिः, प्रमुखः चिन्तायाः विषयः अस्तीति

अफगानिस्तान्-देशे पाकिस्तानस्य वायु-आक्रमणस्य विषये चर्चां कुर्वन् श्रीजैसवालः अवदत् यत् भारतम् एतादृशानां बर्बर-आक्रमणानां निन्दां करोति यत्र नागरिक-मूलसौकर्याणि लक्ष्यीकृत्य जनान् बहु दुःखाय कल्प्यते इति।

### नेतन्याहु-इरान्:

इस्रायल्-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहु-वर्यः अवदत् यत् इस्रायल्-देशः अमेरिकादेशश्च इरान्-देशं विरुध्य सैन्य-अभियानेन सम्पूर्णविश्वस्य रक्षणं कुर्वन्तौ स्तः इति। जेरूसलम्-नगरे पत्रकारसम्मेलनं सम्बोधयन् नेतन्याहु-वर्यः अवदत् यत्, इस्रायल-आक्रमणैः इरान्-देशस्य सैन्यक्षमतायाः महत् अधःपतनं जातमस्तीति, तेहरान्-देशः इतोऽपि युरेनियं-संवर्धितुं न शक्नोति, बैलेस्टिक्-मिसाइल इत्यस्य निर्माणमपि कर्तुं न शक्नोतीति। इरान-देशः प्रमुखं वैश्विकं तैलमार्गं बाधयित्वा विश्वं बन्धयितुं प्रयतमानः अस्तीति आरोपयन् इस्रायल-देशस्य प्रधानमन्त्री दृढतया उक्तवान् यत् एतादृशाः प्रयत्नाः न सफलाः भविष्यन्तीति।

### रक्षा-सहमतिः

साम्प्रतिक- उपग्रह-आधारित-दूरसञ्चार-केन्द्राणाम् अनुरक्षणार्थं, सशस्त्र-बलानां कृते अतिरिक्त-केन्द्राणां व्यवस्थायै च एकीकृत-रक्षा-कर्मचारी-मुख्यालयः, इस्रो-संस्थायाः स्पेस्-अप्लिकेषन्स्-सेण्टर इति संस्थया च सहमति-पत्रम् हस्ताक्षरितवान्। एकीकृत-रक्षा-कर्मचारिणः उप-प्रमुखः एयर्-मार्शल् शङ्कर-सुब्रमणियन्, स्पेस्-अप्लिकेषन्स्-सेण्टर् इत्यस्य निर्देशकः निलेश् एम्. देसायी च एम्. ओ. यू. इत्यस्मिन् हस्ताक्षरं कृतवन्तौ।

## केरला-काङ्ग्रेस्-अभ्यर्थिनां सूचिः

काङ्ग्रेसदलं केरलस्य आगामिविधानसभानिर्वाचनार्थं अभ्यर्थिनां द्वितीयसूचीम् अघोषयत्, सप्तत्रिंशत् अभ्यर्थिनां नामाङ्कनमपि अकरोत्। अरुविक्करा-क्षेत्रात् काङ्ग्रेस्-दलस्य वरिष्ठः नेता वी. एस्. शिवकुमारः दलेन नामाङ्कितः अस्ति, पूर्व-विधायकः के. एस्. सबरीनाधनः नेमोम्-क्षेत्रात् स्पर्धयिष्यति। अस्यां सूच्यां त्रिकरीपुरक्षेत्रात् सन्दीप् वारियर्, कोच्चि-क्षेत्रात् मोहम्मद् शियास्, एट्टुमानूर्-क्षेत्रात् नाट्टकोम् सुरेश्, अरन्मुला-क्षेत्रात् राज्य-युवकाङ्ग्रेस्-सचिवः अबीन् वर्की आदयश्च सन्ति। केरल-राज्ये विधानसभा- निर्वाचनं अग्रिमे मासस्य नवमे दिनाङ्के भविष्यति, मतगणना च मई मासस्य चतुर्थे दिनाङ्के भविष्यति।

## PM-IGNCA:

प्रधानमन्त्रिणा नरेन्द्रमोदिना इन्दिरा-गान्धी-राष्ट्रिय-कला-केन्द्रस्य न्यासधारिभिः सह मिलित्वा, राष्ट्रस्य विविधसंस्कृतेः लोकप्रियतायाः विषये च चर्चां कृतवान्।

## बैडमिन्टन्-ओर्लियन्स्-मास्टर्स्:

ओर्लियन्स्-मास्टर्स्-क्रीडायां ब्याड्मिण्टन्-क्रीडायां तन्वी शर्मा, ईशरानी बरुआ, मालविका बन्सोड् च फ्रान्स्-देशस्य पालेस्-दे-स्पोर्ट्-क्रीडायां महिलानां एकल-क्रीडायाः प्रागुपान्त्य-चक्रे प्रवेशं प्राप्तवत्यः।

।। इति वार्ता:।।